**डॉ. मीरा कुमारी**
**संस्कृत विभाग, सी. एम. जे. कॉलेज, खुटौना**
**ललित नारायण मिथिला विश्विद्यालय, दरभंगा, बिहार**
ईमेल आइडी - kmeera573@gmail.com
मोबाइल नंबर- 6287538352

वर्ग- बीए पार्ट 2 (H) दिनांक - 28-07-2020

विषय- अभिज्ञानशाकुंतलम

क: पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।

अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु।।25।।

अर्थ- राजा (तेजी से शकुंतला के पास जाकर कहते हैं) - अशिष्ट एवं दुष्टों के शासक पूरुवंशी राजा (दुष्यंत) के पृथ्वी का शासन करते हुए होने पर यह कौन है जो भोली भाली तपस्वी कन्याओं के प्रति अशिष्ट - व्यवहार कर रहा है?

व्याख्या-

व्याख्येयम् पद्यरत्नमिदम् अभिज्ञानशाकुंतलम् नाटकस्य प्रथमे अंके विलसतितमाम्। अस्य नाटकस्य रचयिता कालिदास: वर्तते। कालिदासस्य समालोचकै: कविकुलगुरु: कथ्यते। अस्य महाकवे: काल: प्रथमा शताब्दी मन्यते। महाकवे: उपमालंकारस्य प्रयोग: विश्व विश्रुत: अस्ति।

अस्मिन् श्लोके महाकवि कालिदास: राजा दुष्यंतस्य मनोभाव: कथयति यत्-

दुर्विनीतानाम्= अशिष्टानां दुष्टानां वा, शासितरि= दण्डादिना शासके, पौरवे= पुरुवंशोत्पन्ने नृपे दुष्यन्ते, वसुमतीम्= पृथ्वीम्, शासति=रक्षति सति, क:अयम्= को सौ दुष्ट:, मुग्धासु=सरलासु, तपस्वि कन्यासु= मुनिकुमारीषु, अविनयम्= अशिष्टाचरणम्, औद्धत्यं वा, अयमाचरति= प्रयोजयति करोति वा ।

अस्मिन् श्लोके अप्रस्तुतप्रशंसा अलंकार: आर्या छन्द: च वर्त्तते ।

मानुषीषु कथं वा स्यादस्य रूपस्य संभव: ।

न प्रभातरलं ज्योतिरुदेति वसुधातलात्।।26।।

अर्थ- शकुंतला को देखकर राजा दुष्यंत कहते हैं कि इस सौंदर्य की उत्पत्ति मनुष्य लोक की स्त्रियों में कैसे हो सकती है? यह कान्ति से चंचल ज्योति (विद्युत ) पृथ्वी से उत्पन्न नहीं होती है।

व्याख्या-

व्याख्येयम् पद्यरत्नमिदम् अभिज्ञानशाकुंतलम् नाटकस्य प्रथमे अंके विलसतितमाम्। अस्य नाटकस्य रचयिता कालिदास: वर्तते। कालिदासस्य समालोचकै: कविकुलगुरु: कथ्यते। अस्य महाकवे: काल: प्रथमा शताब्दी मन्यते। महाकवे: उपमालंकारस्य प्रयोग: विश्व विश्रुत: अस्ति।

अस्मिन् श्लोके महाकवि: कालिदास: शकुंतलाम् दृष्टवा दुष्यंतस्य मनोभावं कथयति यत्-

अस्य= ईदृशस्य अलौकिकस्य, रूपस्य=सौन्दर्यस्य, संभव:=उत्पत्ति:, मानुषीषु=मनुष्यलोकस्रीषु, कथं वा स्यात्= केन प्रकारेण भवितुमर्हति? कथमपि नेत्यर्थ:। प्रभातरलम्=प्रभया कान्त्या दीप्त्या वा तरलं चंचलं उज्ज्वलं वा, ज्योति:= तेज: (विद्युदित्यर्थ:, चन्द्रादि इति केचित्) वसुधातलात्= पृथ्वी तलात्, न उदेति=न उद्गच्छति, नोत्पद्यते इत्यर्थ:

अस्मिन् श्लोके अप्रस्तुतप्रशंसा, दृष्टान्त, प्रतिवस्तूपमा अलंकार:, अनुष्टुप छन्द: च वर्तते।

वैखानसं किमनया व्रतमाप्रदानाद् व्यापाररोधि मदनस्य निषेवितव्यम्।

अत्यन्तमेव सदृशेक्षणवल्लभाभिराहो निवत्स्यति समं हरिणाङ्गनाभि:।।27।।

अर्थ- इस श्लोक में राजा दुष्यंत उनकी प्रिय सखियों से शकुंतला के बारे में पूछते हैं कि क्या यह कामदेव के व्यापारों को रोकने वाले तापस व्रत का सेवन विवाह होने के समय तक करेगी अथवा एक से नेत्र होने के कारण प्रिय हरिणियों के साथ ही सदैव निवास करेगी?

व्याख्या-

व्याख्येयम् पद्यरत्नमिदम् अभिज्ञानशाकुंतलम् नाटकस्य प्रथमे अंके विलसतितमाम्। अस्य नाटकस्य रचयिता कालिदास: वर्तते। कालिदासस्य समालोचकै:कविकुलगुरु:कथ्यते। अस्य महाकवे: काल: प्रथमा शताब्दी मन्यते। महाकवे: उपमालंकारस्य प्रयोग: विश्व विश्रुत: अस्ति।

अस्मिन् श्लोके राजा दुष्यंत: शकुंतलाया: सख्य:पृच्छति-किं अनया= शकुन्तलया, मदनस्य=कामस्य, व्यापाररोधि= व्यापारंप्रवृत्ति रोद्धुं प्रतिषेद्धुं शीलमस्य इति व्यापाररोधि= कामचेष्टाप्रतिबन्धकम्, वैखानसम्=तपस्विजनोचितम्, वृत्तम् =नियम: धर्म: वा, ब्रह्मचर्यम्= आप्रदानात् वराय प्रदानपर्यन्तम् (परिणयपर्यन्तमित्यर्थ:) निषेवितव्यम्= पालनीयम्। आहो= अथवा सदृशेक्षणवल्लभाभि:= सदृशे स्वसमाने ये ईक्षणे नयने यासां ता:, अत एवं वल्लभा: प्रिया: ताभि:, हरिणांगनाभि:= मृगीभि:, समम्=सह, साकं, वा, अत्यन्तमेव = सातिरेकमेव (यावज्जीवनमेवेत्यर्थ) निवत्स्यति = स्थास्यति।

अत्र परिकर: अलंकार: वसन्ततिलका छन्द: च वर्तते।